श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्) अनुगृहीता

# ॥ श्रीवेङ्कटेश स्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेश स्तुतिः ॥

यत्कृपालेशमात्रेण सदोल्लसति सन्मतिः।
वेदान्तलक्ष्मणस्सोऽयं विभातु हृदि मे गुरुः॥

श्रीमान् वेदान्तसूरिः करकमलयुगे ज्ञानमुद्रां च कोशं
बिभ्राणोब्जासनस्थो वनरुहतुलसीदामवान् वादिसिंहः।
ब्रह्मज्ञस्सर्वतन्त्रेष्वतिकुशलमतिः कीर्तिमूर्तिर्महात्मा
श्रेयोदर्शी जनानां कविकुलतिलकः सन्निधत्तां सदा नः॥ **1** ॥

मान्यादात्रेयगोत्रादखिलगुणनिधेर्मातुलात् देशिकेन्द्रात्
श्रीमद्रामानुजार्यात् अधिगतसकलात्मीयशास्त्रार्थसारः।
प्रत्नाचार्योपदिष्टान्यनितरसुलभान्युक्तिरत्नानि योऽदात्
लोकायामोदतस्तं शुभगुणजलधिं वेदचूडार्यमीडे॥ **2** ॥

वेङ्कं वेदान्तसूरेः पदकमलयुगं सर्वदा भावयेऽहं
प्राज्ञानां शुद्धबुद्धिप्रदमुरुसुखदं मोक्षदोपायनिष्ठम्।
यत्प्राप्त्यर्थं जुहावाश्रितजनशरणोऽनन्तसूरिञ्च सुप्तौ
विश्वामित्रान्ववायं वृषगिरिदयितः स्वीयघण्टां प्रदित्सुः॥ **3** ॥

कञ्जस्य द्विपदस्य पर्णतुलनां याताङ्गुलीनां ततिः
श्रीमद्वेदशिरोगुरोरविरतं मन्मानसे प्रोल्लसेत्।
यं प्राप्तुं वृषशैलनायकहरेः घण्टामयं प्रापिता
माता द्वादशवत्सरैरबिभरत् तोता स्वगर्भे शुभैः॥ **4** ॥

टङ्कं यद्दुरितोपलोद्भिदलने वेदान्तसूरेः पद
    द्वन्द्वं भावयतां अलङ्कृतरथच्छत्रादि विभ्राजते।
यः काञ्च्यां विभवे नभस्य उदितः विष्णोश्शुभे भे महे
    तीर्थाहे वृषशैलशेखरपतेः वर्वर्ति कीर्त्युज्वलः ॥ 5 ॥

नाथे श्रीकविवादिपञ्चवदनाचार्यस्य जङ्घायुगं
    संसारानुगतेर्निवर्त्य तरसा गत्यै च निश्रेयसः।
यो रामानुजसूदसूनुजसुतासूनुर्भवत्यद्भुतः
    श्रीरामानुजवादिहंसगुरुरस्यान्तेनिवास्यार्तिहा ॥ 6 ॥

थाभासं तदुरोजविभ्रमनिभं जान्वोर्युगं संस्मरा -
    म्यात्मज्ञानददर्पणं पदजुषां श्रुत्यन्तचूडागुरोः।
प्राचार्यस्य मुदावहो वरदगुर्वाख्यस्य यः शैशवे
    तस्यानुग्रहतः प्रभावितमतिस्साशीर्वचः प्रेक्षितः ॥ 7 ॥

आर्यो देशिकवर्य एष नियतश्चारूरुयुग्मं स्तुवम्
    न्यास श्रीकृतमङ्गलाभिषवण स्तन्नागशुण्डोपमम्।
पित्रा यस्समुपात्तकर्मनिचय स्तेनोपनीत स्तथा
    साङ्गाध्याय उपाजहार सुदतीं लेभे गुरुं तं स्तुवे ॥ 8 ॥

कल्याणं दिशतात् कटीतटवरः दिव्यस्त्रयीशेखरा -
    चार्यस्यामलकोमलाद्रिरुचिरः श्रीवासनामोदितः।
वेदान्तद्वयमात्ममातुलकृपाभूम्ना रहस्यान्यपि
    प्राप्याभ्राजत सर्वशास्त्रनिपुणो यस्तं श्रये देशिकम् ॥ 9 ॥

विश्वासातिशयं दिशेदविरतं श्रीवेदचूडागुरोः
    कट्या चोर्ध्वधृतस्सुधांशुधवलो भात्युत्तरीयस्सदा।
काञ्च्यां यो वरदं रमासहचरं संसेवमानो नुतीः
    सर्वाभीष्टफलप्रदास्सुपठतां बह्वीर्वितन्वन् बभौ ॥ 10 ॥

तारार्थं निगमान्तदेशिकमणेः नाभिर्महाब्धेर्महा -
 वर्तोत्कर्षवती स्फुटं प्रकटयत्वात्मावबोधं हितम्।
पारावार परीवृतेऽतिमहिते तारार्थधाराधरः
 योऽवर्षत् स्वकृते रहस्यनिचये लोकाभिरक्षोन्मुनाः॥ **11** ॥

किं वा वर्णयितुं क्षमा वयमिमे यो निर्मये सत्कृतीः
 तद्द्येयादुदरं वलित्रयधरं श्रीवेदचूडागुरोः।
भक्तेष्टप्रदमाप्तसिन्धरमुखं बन्धुं बुधानां सदा
 श्लोकैस्संस्तुतवान् अवाप सकलास्सिद्धीश्च सर्वेष्टदाः॥ **12** ॥

कर्तव्यं सकृदेव तत्प्रपदनं सर्वार्थदं श्रीपते
 शास्त्रोदीरितवर्त्मनेत्यसदृशैः ग्रन्थैर्व्यवास्थापयत्।
यो वा वेङ्कटनाथदेशिकमणिः विद्धिद्धि राशंसितः
 श्रीशैलेशदयाशतीं विरचयन्हृष्टस्त माभावये॥ **13** ॥

केनान्येन विवादतो मलिनतां प्राप्ता प्रपत्तिः परा
 निर्दुष्टा सकलेष्टदा श्रुतिशिरस्सूरिं विना रक्षिता।
येनाद्यावधि सुप्रतिष्ठितमिता निष्कण्टका भ्राजते
 सोऽयं श्रीनिगमान्तदेशिकमणिः भूयात् सतां श्रेयसे॥ **14** ॥

सन्मार्गं नयतात् तनोतु सदयं वेदान्तसूरेरुरः
 स्वान्तं मे विमलीकरोतु च सदा सद्भावनापूरितम्।
सारासारविवेचकं कलयतात् श्रीरङ्गराजोषितं
 तत्तादृङ्मनसं परात्पररसं सञ्चिन्तयाम्यन्वहम्॥ **15** ॥

रीतिस्सर्वा यदीया सकलजनमनोहारिणी शर्मदात्री
 बाह्वोर्मूले विभातां श्रुतिशिखरगुरोरङ्कितै शङ्खचक्रे।
चक्रे श्रीरङ्गनेतुश्चरणकमलयोर्मङ्गळाशासनं यः
 वाद्युन्मत्तान् जिगाय प्रमुदितहृदयस्संस्तुवे तं सदाहम्॥ **16** ॥

वेदान्ताचार्यवर्यो दिशतु सुविशदं सर्ववेदान्ततत्वं
व्याख्यामुद्राकरो य श्शुभगुणनिलयस्सत्यवाक् शुद्धकर्मा।
प्रज्ञाकल्पद्रुमस्सन् सकलसुमनसां सर्वकामान् प्रदेयात्
धन्या यत्सप्तशत्यामहमतिविभवं कीलकेऽपीक्षितारः॥ **17** ॥

दान्तो वेदान्तसूरिर्विषमभवकृतात् बन्धनान्मोचयेन्नः
प्रज्ञाकूपारपारङ्गत उरुकरुणः पुस्तकोद्धासिहस्तः।
यः प्रागस्तोकबुद्धिं व्यजयत विबुधं कृष्णमिश्रं प्रभावान्
स्वीयात् सङ्कल्पसूर्योदयत इह मुदा प्राप तं संश्रयेऽहम्॥ **18** ॥

तान्तानस्मान् नितान्तं करणपरवशान् सान्त्वयेदात्मवाग्भिः
यत्तातोऽनन्तसूरिस्स्वयमपि सकलाम्नायचूडार्यसूरिः।
कण्ठस्तस्योपकण्ठानतजननिवहान् शङ्खसङ्काशकाशः
श्रीभाष्यं कण्ठपाठं व्यतनुत सुलभं तं च सम्भावयामि॥ **19** ॥

चार्वाकान् चारुगीर्भिः श्रुतिपथविमुखान् लोकसम्मोहकांस्तान्
अद्धा दूरीचकार श्रुतिशिखरगुरुर्नीतिमूर्तित्रयीभिः।
सच्चारित्रं यदीयं तदवतु महतो दुष्कृतान्मां पुनातु
वैदुष्यं चातनोतु प्रियहयवदनाम्भोजपीयूषपायी॥ **20** ॥

यस्मिन् रामानुजार्यः परमकरुणया स्वीयसिद्धान्तरक्षा -
भारं श्रीकूरनाथप्रभृतिगुरुवरद्वारतोऽस्थापयत् सः।
वेदान्तार्याभिधानः कलितबहुयशाः लक्ष्मणांशं दधानः
कुर्यात् वैराग्यमूर्तिस्त्वधिकशतकृतीः सर्वजिह्वाविधेयाः॥ **21** ॥

वर्धिष्णुर्विष्णुनाम्नां जपत इह जनो याति सर्वार्थसिद्धिं
वेदान्ताचार्यनाम्नां मननत उभयाम्नायवेत्ता चकास्ति।
तत्पादाब्जप्रणामादनितरसुलभां स्तान्पुमर्थानुपैति
तद्ग्रन्थालोकनेन प्रविजितविमतस्सम्प्रबुद्धौ विभाति॥ **22** ॥

यस्साक्षाद्वेङ्कटेशो जगदुपकृतये स्वेन नाम्नाविरासीत्
    तद्घण्टांशोऽथवेति प्रथित इह गुरुर्यस्य पुत्रोऽपि तद्वत्।
श्रीमद्देवाधिराजो वरद इति समाभिख्ययासीत् प्रसिद्धः
    तं विद्वद्बृन्दवन्द्यं सुतवरसहितं वेदचूडार्य मीडे॥ **23**॥

मेनेऽमेयप्रभावं प्रतिभटरहितं सर्वतन्त्रस्वतन्त्रं
    कुर्वाणं वीक्ष्य यामे त्वनितरसुकरं रङ्गपादूसहस्रम्।
यं च श्रीरङ्गराजः कविकथकघटाकेसरीत्याजुहाव
    श्रेयस्सूतिं सतां तं रचितबहुकृतिं संस्तुवे देशिकेन्द्रम्॥ **24**॥

संक्षिप्ता विस्तृता वा कृतिततिरतुला तत्तदिच्छानुरूपा
    वेदान्तार्यप्रणीता सकलजनमनोहारिणी धारणीया।
सङ्ख्यातीतापि तत्र प्रभवति विदिता मुक्तये काचिदेका
    तत्तादृक्तारतम्यं कृतिषु न तु फले यस्य तं संस्तवीमि॥ **25**॥

नित्यं तत्कर्णयुग्मं श्रुतिमधुरमनुं श्रीमुखोद्भासि वर्णं
    मद्गीतं श्लोकरूपं निशमयतु गुरुस्सर्वदं सर्वदाता।
वेदान्तार्यस्सुवर्णं निजतनयकृतं हर्षतो गानलोलान्
    सम्प्रेक्ष्याध्यात्मचिन्ताफलभुगभिमुखान् संविधत्तां श्रितान्नः॥ **26**॥

धत्ते श्रीवैष्णवीयां श्रियमळिकतलं सूर्ध्वपुण्ड्रोज्ज्वलं यत्
    वेदान्तार्यस्य तत्तद्गुरुवरकृपया सर्व एवोपयन्तु।
व्याख्या सौदर्शनीया यतिपतिरचितश्रीतभाष्यस्य याप्ता
    यश्च प्राचीकटत्तां अतिविमलमतिष्वद्य यावत् स्तुवे तम्॥ **27**॥

तामेवाहं समीडे कविकथकहरेर्नीलचूडां सुकेशैः
    युक्ता मस्याब्जमाध्वीव्रतिभिरिव हरेर्मूर्तिमद्भिः कटाक्षैः।
एवं चापादचूडं गुरुवरसुषुमा संश्रितानां सुशोभां
    सर्वक्षेमाय नित्यं प्रदिशतु च महाचार्यभूमा महात्मा॥ **28**॥

सत्यं शान्तिर्विरक्तिर्विजितकरणता साधुता पारतन्त्र्यं
    नैस्पृह्यं धीरता श्रीपतिपदकमलासक्ति रक्षोभ्यता च।
कारुण्यं निर्भरत्वं शुचिमृदुपटुता नम्रता मान्यतेति
    यस्मिन्नाजानशुद्धाश्शुभगुणनिवहास्तं श्रये देशिकेन्द्रम्॥ 29 ॥

दाता वेदान्तसूरिः श्रुतिशतसुधियः संश्रितानां दयालुः
    नानासिद्धान्तवेत्ता प्रणतमतिमतां सद्रहस्योपदेष्टा।
विश्वात्मोज्जीवनैकप्रपदनकलया दर्शितात्मप्रकर्षः
    सङ्ख्यातीतप्रबन्धप्रणयननिपुणः पातु नस्तन्मनस्कान्॥ 30 ॥

हृद्यां स्वाद्यां रसज्ञा स्तुतिममु मधुना यत् त्वदीयां बुधानां
    मोदात् वेदान्तसूरे ! विभवकृतजने ! कीलकेऽन्यासमाने।
आनन्दोद्धर्षवर्षे रसयति तदिदं त्वत्कटाक्षेक्षितानां
    अस्माकं भागधेयं सुफलितमभवत् सप्तशत्युत्सवाहे॥ 31 ॥

दिव्या व्याख्यानरीतिर्विविधकृतिततेर्यत्कृता सुप्रसिद्धा
    लक्ष्म्यास्तत्वप्रतिष्ठा प्रपदनमहिमोत्कर्षताऽऽविष्कृता च।
यद्विक्षिप्ता विपक्षा यतिपतिमतसंरक्षणेऽत्यन्तदक्षः
    सोऽयं वेदान्तसूरिर्विलसतु जगतां रक्षणे बद्धदीक्षः॥ 32 ॥

॥ इति श्रीवेङ्कटेश स्तुतिः समाप्ता॥